यः स्वधर्म्मं परित्यज्य परधर्म्मं समाचरेत् ।
तं शतेन नृपो दण्ड्यः पुनस्तस्मिन्नियोजयेत् ॥
सांवत्सरेषु कृत्येषु विशेषैतान् समाचरेत् ।
अवश्यं पार्थिवो राजन् विशेषांस्तु शृणुष्व मे ॥
शरत्काले महाष्टम्यां दुर्गायाः परिपूजनम् ।
नीराजनं दशम्यान्तु कुर्य्याद्वै बलवृद्धये ॥
पौषे मासि तृतीयायां कुर्य्यात् पुष्याभिषेचनम् ।
पूजयित्वा श्रियं देवीं श्रीपञ्चम्यां नृपश्चरेत् ॥
श्रीयज्ञं धनधान्यस्य वृद्धये नृपसत्तमः ।
ज्यैष्ठे दशहरायान्तु विष्णोरिष्टं समाचरेत् ॥
रवौ हरिस्थे द्वादश्यां शक्रपूजां समाचरेत् ।
विशेषैतांस्तु नृपतिः कुर्य्यात् सर्वं बहुव्ययैः ।
एभिः कृतैर्बलं राज्यं कोषश्चापि विवर्द्धते ॥
अकृतेष्वेषु यज्ञेषु दुर्भिक्षं मरकं तथा ।
जायते च नृपस्तस्मादेष यज्ञं समाचरेत् ॥
शरत्काले महाष्टम्यां दुर्गायाः पूजने विधिः ।
पुरा प्रोक्तस्तु विधिना तेन कार्य्यन्तु पूजनम् ॥”
इति कालिकापुराणे ८६ अध्यायः ॥*॥

अपि च ।
“सदाचारे विशेषोऽयं कथितस्तव पार्थिव ! ।
निषेधेषु विशेषांस्तु शृणु येन श्रियेष्यते ॥
असंपूज्य तथा विष्णुं शिवामग्निं पुरन्दरम् ।
अदत्त्वा च तथा दानं न भुञ्जीयान्नृपः क्वचित् ॥
हावयेदग्निहोत्रन्तु नित्यमेव पुरोहितैः ।
अहुत्वा चाग्निहोत्रन्तु भुञ्जन्नरकमाप्नुयात् ॥
नारक्षिते गृहे राजा रक्षर्द्धिपरिवर्ज्जिते ।
स्वपेत्तथा स्त्रिया सार्द्धं न कदाचन संविशेत् ॥
भुक्ताग्रं श्रीफलं नाद्यात्तथा धात्रीफलं नृपः ।
बुद्धिक्षयकरा एता माष आसवमृत्तिकाः ॥
निम्बाटरूषहृत्ताश्च बुद्धिवृद्धिकरा न ताः ।
बुद्धिवृद्धिहराश्चिव्यं त्यजेद्राजा च भोजने ॥
भोजयेदन्वहं बुद्धिवृद्धिहेतुं नृपोत्तमः ।
न पर्य्यायविहीनन्तु प्रारोहेदासनं नृपः ॥
न यानं न गजानश्वमारोहेद्वीक्ष्य ब्राह्मणम् ।
नैकन्तु विचरेद्राजा कदाचिदपि निर्जने ॥
मदहेतुं न भुञ्जीयात् कदाचिदपि भोजने ॥
कदापि नोपसेवेत ह्यष्टम्यां मांसमैथुने ॥
अमास्नानं गयाश्राद्धं तिलैस्तर्पणमेव च ।
न जीवत्पितृको भूपः कुर्य्यात् कृत्वावमाप्नुयात् ।
न क्षेत्रजादींस्तनयान् राजा राज्येऽभिषेचयेत् ।
पितॄणां श्राद्धयेन्नित्यमौरसे तनये सति ॥
औरसः क्षेत्रजश्चैव दत्तः कृत्रिम एव च ।
गूढोत्पन्नोऽपविद्धश्च भागार्हास्तनया इमे ॥
कानीनश्च सहोढश्च क्रीतः पौनर्भवस्तथा ।
स्वयंदत्तश्च पौत्रश्च षड़िमे पुत्रपांशुलाः ॥
अभावे पूर्व्वपूर्व्वेषां परान् समभिषेचयेत् ।
पौनर्भवं स्वयं दत्तं दासं राज्ये न योजयेत् ॥
दत्ताद्याश्चापि तनया निजगोत्रेण संस्कृताः ।
आयान्ति पुत्रतां सम्यगन्यबीजसमुद्भवाः ॥
पितुर्गोत्रेण यः पुत्रः संस्कृतः पृथिवीपते ।
आचूड़ान्तं न पुत्रः सः पुत्रतां याति चान्यतः ॥
चूड़ाद्या यदि संस्कारा निजगोत्रेण वैकृताः ।
दत्ताद्यास्तनयास्ते स्युरन्यथा दास उच्यते ॥
ऊर्द्ध्वन्तु पञ्चमाद्वर्षाद्दत्ताद्याश्च सुता नृप ।
गृहीत्वा पञ्चवर्षीयं पुत्रेष्टिं प्रथमं चरेत् ॥
पौनर्भवन्तु तनयं जातमात्रं समानयेत् ।
कृत्वा पौनर्भवं स्तोमं जातमात्रस्य तस्य वै ॥
सर्व्वांस्तु कुर्य्यात् संस्कारान्जातकर्म्मादिकान्नरः ।
कृते पुनर्भवस्तोमे सुतः पौनर्भवस्तथा ॥
एकोद्दिष्टं पितुः कुर्य्यान्न श्राद्धं पार्व्वणादिकम् ।
क्रीताद्या वनिता मूल्यैः सा दासीति निगद्यते ॥
तस्यां यो जायते पुत्रो दासः पुत्रस्तु स स्मृतः ।
न राज्ञो राज्यभाक् स्याद्विपुलामपि श्राद्धकृत् ।
अधमः सर्व्वपुत्रेभ्यस्तं तस्मात् परिवर्जयेत् ॥
पुराणधर्म्मशास्त्राणि संहिताश्च मुनीरिताम् ।
नाध्यापयेन्नृपः शूद्रैर्व्विहितान्यत् यदृच्छया ॥
यस्य राज्ये सदा शूद्राः पुराणं संहितां तथा ।
पठन्ति स्याद्धीनाशी राजा राष्ट्रेण सान्वयः ।
मोहाद्वा कामतः शूद्रः पुराणं संहितां स्मृतिम् ।
पठन्नरकमाप्नोति पितृभिः सह पापकृत् ॥
शूद्रोक्त्या विहितं यच्च यच्च मन्त्र उदाहृतः ।
तद्द्वयं विप्रवदानाद्ग्राह्यं शूद्रैः सदैव हि ॥
न योजयेन्नृपः शूद्रं व्यवहारस्य दर्शने ।
नियोज्य तत्र तं भूप ! तामिस्रे तेन पच्यते ।
हीनायुश्च भवेल्लोको राजा चापि सहान्वयः ॥
काणं व्यङ्गमन्धपुत्रं वानभिज्ञमजितेन्द्रियम् ।
न ह्रस्वं व्याधितं वापि नृपः कुर्य्यात्पुरोहितम् ॥
कृपणस्य धनं राजा न गृह्णीयात् कदाचन ।
न द्विजानां तथा दद्याद्धनानि विपुलान्यपि ॥
नारोहेत् कामुकोन्मत्तं गजं राजा कदाचन ।
आरुह्य कामुकं तन्तु परत्रेह विषीदति ॥
अनायुष्यं न कुर्य्यात्तु कर्म्म भूपः कदाचन ।
सततं आयुषो वृद्ध्यै यतेत सकलैर्बलैः ॥
न क्रूरवारे नाष्टम्यां न षष्ठ्यां नृपसत्तमः ।
अञ्जनाभ्यञ्जने कुर्य्यात्ताम्बूलस्यापि भोजनम् ॥
अतिसूक्ष्मं तथा पूर्णं ग्रहणं चन्द्रसूर्य्ययोः ।
नालोकयेत् स्वयं राजा रक्तं सूर्य्यं तथैव च ॥
उत्पातं जायते यत्तु दिव्यं भौमञ्च नाभसम् ।
नेक्षेत यत्नान्नृपतिर्दृष्ट्वा नाद्यात् त्र्यहं पनः ॥
सर्व्वदा मङ्गलं रत्नं धारयेत् सह दूर्व्वया ।
अवस्त्राच्छादितं गात्रं न विप्रेभ्यः प्रदर्शयेत् ॥
न तोये स्वं मुखं पश्येन्नाद्यान्मांसानि पर्व्वसु ।
नारोहेत खरं चोष्ट्रं न वामीमपि गुर्व्विणीम् ॥
एवं नययुतो राजा चतुरङ्गं विवर्द्धयन् ।
आत्मानं सततं रक्षन् सदा वीर्य्यं विवर्द्धयेत् ॥
बीजक्षयकरं नित्यं भक्ष्यं भोज्यञ्च पानकम् ।
वर्ज्जयेत् क्षारशाकाद्यामलञ्च बहुतिक्तकम् ॥
कांस्यराजतरङ्गस्थं तोयं पानेऽप्यवर्द्धनम् ।
मूत्रवृद्धिकरं बीजक्षयकारि विवर्ज्जयेत् ॥
ताम्रायःस्वर्णसीसानां पात्रस्थं फलचर्म्मणोः ।
शुक्रवृद्धिकरं तोयं तदुपाशीत यत्नतः ॥
सर्व्वमूलेषु कृत्येषु सदाचारैरनुष्ठितः ।
भुक्त्वेह विविधान् भोगानैन्द्रं स्थानं व्रजेत् परं ॥

श्रीमार्कण्डेय उवाच ।
एवमौर्व्वस्तु सगरं शशास मुनिपुङ्गवः ।
शास्त्राणि चैव सर्व्वाणि सदाचारान् संगुह्यकान् ।
बहुशः कथयामास सगराय महात्मने ॥
तन्नास्ति यत् पुरौर्व्वेण कथितं सगराय न ।
राजनीतिः सतां नीतिर्यच्चान्यच्छास्त्रसम्भवम् ॥
संहितासु पुराणेषु यच्चागमचये स्थितम् ।
सर्व्वं शुश्राव सगरो मुखादौर्व्वस्य धीमतः ॥
तेषान्तु कथितं किञ्चिदुद्धृत्य द्विजसत्तमाः ।
विष्णुधर्म्मोत्तरे पूर्वं मया रहसि भारते ॥
राजनीतिं सदाचारं वेदवेदाङ्गसङ्गतम् ।
रहस्यं सततं विष्णोर्भीक्ष्णं द्विजसत्तमाः ॥
यच्चानुदितमन्यत्र मदितं वा ससंशयम् ।
संशयच्छेदनं तेषु युष्माभ्यं कथितं त्विदम् ॥
अनुक्तं संशयच्छेदि पुराणं कालिकाह्वयम् ।
योऽभ्यसेत् सततं विप्रः स वेदानां फलं लभेत् ॥”
इति श्रीकालिकापुराणे ८९ अध्याये राजनीति-सदाचारादिकं समाप्तम् ॥ * ॥ अन्यच्च ।

ऋषय ऊचुः ।
“सदाचारो निगदितस्तव योऽस्माभिरादरात् ।
लक्षणं तस्य वक्ष्यामस्तच्छृणुष्व निशाचर ॥
गृहस्थेन सदा कार्य्यमाचारपरिपालनम् ।
न ह्याचारविहीनस्य भद्रमत्र परत्र च ॥
यज्ञदानतपांसीह पुरुषस्य न भूतये ।
भवन्ति यः समुल्लङ्घ्य सदाचारं प्रवर्त्तते ॥
दुराचारो हि पुरुषो नेह नामुत्र नन्दति ।
कार्य्यो यत्नः सदाचारे आचारो ह्यन्यलक्षणम् ॥
तस्य स्वरूपं वक्ष्यामः सदाचारस्य राक्षस ।
शृणुष्वैकमनास्त्वञ्च यदि श्रेयो हि वाञ्छसि ॥
धर्म्मोऽस्य मूलं धनमस्य शाखा
पुष्पञ्च कामः फलमस्य मोक्षः ।
असौ सदाचारतरुः सुकेशिन्
संसेवितो येन स पुण्यभोक्ता ॥
ब्राह्मे मुहूर्त्ते प्रथमे विबुध्ये
दनुस्मरेद्देववरं महर्षीन् ।
प्राभातिकं मङ्गलमेव वाक्यं
यदुक्तवान् देवपतिस्त्रिनेत्रः ॥

सुकेशी उवाच ।
किं तदुक्तं सुप्रभातं शङ्करेण महात्मना ।
प्रभाते यत् पठन् मर्त्यो मुच्यते पापबन्धनात् ॥

ऋषय ऊचुः ।
श्रूयतां राक्षसश्रेष्ठ सुप्रभातं हरोदितम् ।
श्रुत्वा स्मृत्वा पठित्वा च सर्व्वपापैः प्रमुच्यते ॥
ब्रह्मा मुरारिस्त्रिपुरान्तकारी
भानुः शशी भूमिसुतो बुधश्च ।
गुरुः सशुक्रः सह भानुजेन
कुर्व्वन्तु सर्व्वे मम सुप्रभातम् ॥
भृगुर्वशिष्ठः क्रतुरङ्गिराश्च
मनुः पुलस्त्यः पुलहः सगौतमः ।
रैभ्यो मरीचिश्च्यवनो विभुश्च
कुर्व्वन्तु सर्व्वे मम सुप्रभातम् ॥